# पञ्चम: पाठ: युग्ममाला। (कण्ठस्थीकरणार्थम्)

संस्कृतसाहित्ये शब्दयुग्मानि प्रसिद्धानि । यथा - **यदा-तदा, यावत्-तावत्, यत्र-तत्र** । उदा.- **यथा** राजा **तथा** प्रजा। शब्दयुग्मानाम् उपयोगेन श्लोकस्य वाक्यस्य वा सौन्दर्यं वर्धते ।

**वृत्तम्-वंशस्थम्**

यथा चतुर्भि: कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनै:।
तथा चतुर्भि: पुरुष: परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा।।१।। - वृद्धचाणक्यशतकात्

अन्वय: - **यथा** कनकं निघर्षण - छेदन - ताप-ताडनै: (इति) चतुर्भि: परीक्ष्यते, **तथा** पुरुष: श्रुतेन, शीलेन, गुणेन, कर्मणा (इति) चतुर्भि: परीक्ष्यते ।

**वृत्तम्-अनुष्टुप्**

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।।२।। - हितोपदेशात्

सन्धिविग्रहा: - १) नास्ति = न + अस्ति । २) श्लाघ्यस्तत्राल्पधीरपि = श्लाघ्य: + तत्र + अल्पधी: + अपि। ३) एरण्डोऽपि = एरण्ड: + अपि ।

अन्वय: - **यत्र** विद्वज्जन: न अस्ति, **तत्र** अल्पधी: अपि श्लाघ्य: (भवति) । (यथा) निरस्तपादपे देशे एरण्ड: अपि द्रुमायते ।

**वृत्तम्-अनुष्टुप्**

तावद् भयाद्धि भेतव्यं यावद् भयमनागतम्।
आगतं तु भयं वीक्ष्य नर: कुर्याद् यथोचितम्।।३।। - पञ्चतन्त्रात्

सन्धिविग्रहा: - १) भयाद्धि = भयात् + हि । २) भयमनागतम् = भयम् + अनागतम् ।

अन्वय: -**यावत्** भयम् अनागतं **तावत्** हि भयात् भेतव्यम् ।(तथापि) आगतं तु भयं वीक्ष्य नर: यथोचितं कुर्यात्।

**वृत्तम्-अनुष्टुप्**

उत्तमो नातिवक्ता स्यादधमो बहु भाषते।
सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते।।४।।

सन्धिविग्रहा: - १) उत्तमो नातिवक्ता = उत्तम: + न + अतिवक्ता । २) स्यादधमो बहु = स्यात् + अधम: + बहु । ३) ध्वनिस्तादृग्यादृक्कांस्ये = ध्वनि: + तादृक् + यादृक् + कांस्ये ।

अन्वय: - उत्तम: अतिवक्ता न स्यात्, अधम: बहु भाषते । **यादृक्** कांस्ये (ध्वनि:) प्रजायते **तादृक्** सुवर्णे ध्वनि: न (प्रजायते) ।


**वृत्तम्-अनुष्टुप्**

यादृशं वपते बीजं क्षेत्रमासाद्य कर्षक: ।
सुकृते दुष्कृते वाऽपि तादृशं लभते फलम् ।।५।।

सन्धिविग्रहा: - १) क्षेत्रमासाद्य = क्षेत्रम् + आसाद्य । २) वाऽपि = वा + अपि ।

अन्वय: - कर्षक: क्षेत्रम् आसाद्य **यादृशं** बीजं वपते (**तादृशं** फलं लभते) । (तथैव मनुष्य:) सुकृते वा दुष्कृते वा अपि **तादृशं** (इष्टम् अनिष्टं वा) फलं लभते ।

**भाषाभ्यास:**



**श्लोक: १**


**१. पूर्णवाक्येन उत्तरत।**

अ) कनकपरीक्षा कथं भवति ?


आ) पुरुषपरीक्षा कथं भवति ?

२. जालरेखाचित्रं पूरयत

अ)




आ)




श्लोकः २.

१. पूर्णवाक्येन उत्तरत।

अ) अल्पधीः कुत्र श्लाघ्यः भवति ?

आ) एरण्डः कुत्र द्रुमायते ?

२. सन्धि-विग्रहं कुरुत ।

अ) श्लाघ्यस्तत्र आ) अल्पधीरपि ।

श्लोकः ३.

१. पूर्णवाक्येन उत्तरत ।

अ) आगतं भयं वीक्ष्य नरः किं कुर्यात् ?

२. सन्धिविग्रहं कुरुत ।

भयाद्धि ।

श्लोकः ४.

१. पूर्णवाक्येन उत्तरत

अ) कः बहु भाषते ?

२. सन्धिविग्रहं कुरुत ।

अ) स्यादधमः ।

श्लोकः ५.

१. पूर्णवाक्येन उत्तरत ।

अ) कर्षकः कीदृशम् फलं लभते ?

२. सन्धिविग्रहं कुरुत ।

अ) क्षेत्रमासाद्य आ) वाऽपि ।

१) समानार्थकशब्दान् लिखत ।

कनकम्, विद्वान्, पादपः, अधमः ।

२) विरुद्धार्थकशब्दान् लिखत ।

गुणः, विद्वान्, उत्तमः, सुकृतम् ।

३) समानार्थकशब्दानां मेलनं कुरुत ।

| | |
|---|---|
| अ) | सुवर्णम्, उत्तमः, कृषकः, ध्वनिः |
| आ) | शब्दः, क्षेत्राजीवः, हेम, श्रेष्ठः |

४. अमरकोषात् योग्यं समानार्थक शब्दं योजयित्वा वाक्यं पुनर्लिखत ।

अ) चतुर्भिः कनकं परीक्ष्यते । आ) कर्षकः बीजं वपते ।

इ) यत्र एकः अपि पादपः नास्ति तत्र एरण्डः द्रुमायते ।

५) चतुर्थपदं लिखत ।

अ) विद्वान् - पण्डितः :: अल्पधीः - _______।

आ) श्लाघ्यः - प्रशंसनीयः :: द्रुमः - _______।

इ) नरः - मनुष्यः :: उचितम् - _______।

ई) वीक्ष्य - दृष्ट्वा :: भयम् - _______।

**रिक्तस्थानं पूरयत ।**

अ) **यदा** अध्यापकः न आगच्छति _______ छात्राः स्वाध्यायं कुर्वन्ति ।

आ) _______ धूमः **तत्र** वह्निः ।

इ) _______ आकाशे मेघाः गर्जन्ति **तदा** मयूरः नृत्यति ।

ई) **यथा** विचारः _______ वर्तनम् ।

उ) **यदि** सम्यक् पठिष्यसि _______ जीवने यशः प्राप्स्यसि ।

ऊ) सज्जनाः _______ वदन्ति **तथा** कुर्वन्ति ।

7LIYR8

**१. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

अ) एतद् विश्वम् अणुभि: निर्मितम् ।
आ) द्रव्यस्य आदिम: घटक: परमाणु: अस्ति ।
इ) अर्णव: क्षेत्रात् तण्डुलान् आनयति ।

**२. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

अ) अर्णव: ________ गृहीत्वा प्रविशति । (जपाकुसुमम्/कमलम्)
आ) एतद् विश्वं ________ निर्मितम् । (अणुभि:/तण्डुलै:)
इ) ________ द्रव्यस्य मूलकारणम् । (सुगन्ध:/परमाणु:)

**३. विग्रहवाक्याणां समासनामभि: मेलनं कुरुत ।**

| समासविग्रह: | समासनाम |
|---|---|
| १. पुस्तकस्य पठनम् | कर्मधारय: |
| २. सूक्ष्मा: कणा: | षष्ठी-तत्पुरुष: |
| ३. परम: अणु: | बहुव्रीहि: |
| ४. महान् भाग: यस्य स: | उपपद-तत्पुरुष: |
| ५. पादै: पिबति इति | कर्मधारय: |

| समासविग्रह: | समासनाम |
|---|---|
| १. परागस्य कणा: | कर्मधारय: |
| २. कणाद: नाम मुनि: | उपपद-तत्पुरुष: |
| ३. अल्पा धी: यस्य स: | षष्ठी-तत्पुरुष: |
| ४. किञ्चित् जानाति इति | कर्मधारय: |
| ५. जपा नाम कुसुमम् | बहुव्रीहि: |

**४. लकारं लिखत ।**

अ) सूक्ष्मेक्षिकया पश्य ।
आ) कणादविषयकाणि नैकानि पुस्तकानि सन्ति ।
इ) नर: यथोचितं कुर्यात् ।
ई) कर्षक: तादृशं फलं लभते ।

**५. योग्यं वाच्यपर्यायं चिनुत ।**

अ) अस्माभि: सूक्ष्मकणेषु अङ्गानि दृश्यन्ते । (कर्तृवाच्यम्/कर्मवाच्यम्)
आ) वयं महाभागस्य नामधेयं जानीम: । (कर्तृवाच्यम्/कर्मवाच्यम्)
इ) कणादेन परमाणो: व्याख्या कृता । (कर्तृवाच्यम्/कर्मवाच्यम्)
ई) कर्षक: फलं लभते । (कर्तृवाच्यम्/कर्मवाच्यम्)

**६. योग्यं क्रियापदं चित्वा वाक्यं पुनर्लिखत ।**

अ) त्वं द्रष्टुं _____। (शक्नोषि/शक्नोति)
आ) भवान् _____। (स्वीकुरु/स्वीकरोतु)
इ) त्वं तण्डुलान् _____।(आनय/आनयतु)
ई) त्वं श्व: मम महाविद्यालयम् _____। (आगच्छ/आगच्छतु)

**७. उचितं कारणं चिनुत ।**

अ) पिता अर्णवाय स्वमहाविद्यालयम् आगन्तुं कथयति यत: ______________________________ ।
१. पितु: महाविद्यालये कणादविषयकाणि पुस्तकानि सन्ति।
२. पितु: महाविद्यालये स्नेह-सम्मेलनम् अस्ति।